**Sri Durga Suuktam**

oṃ ‖ jātave'dase sunavāma soma' marātīyato nida'hāti vedaḥ' |
sa naḥ' par-ṣadati' durgāṇi viśvā' nāveva siṃdhuṃ' duritā'tyagniḥ ‖

tāmagniva'rṇāṃ tapa'sā jvalaṃtīṃ vai'rocanīṃ ka'rmaphaleṣu juṣṭā''m |
durgāṃ devīgṃ śara'ṇamahaṃ prapa'dye sutara'si tarase' namaḥ' ‖

agne tvaṃ pā'rayā navyo' asmāṃth-svastibhirati' durgāṇi viśvā'' |
pūśca' pṛthvī ba'hulā na' urvī bhavā' tokāya tana'yāya śaṃyoḥ ‖

viśvā'ni no durgahā' jātavedaḥ siṃdhunna nāvā du'ritā'ti'par-ṣi |
agne' atrivanmana'sā gṛṇāno'''smākaṃ' bodhyavitā tanūnā''m ‖

pṛtanā jitagaṃ saha'mānamugramagnigṃ hu'vema paramāth-sadhasthā''t |
sa naḥ' par-ṣadati' durgāṇi viśvā kṣāma'ddevo ati' duritā'tyagniḥ ‖

pratnoṣi' kamīḍyo' adhvareṣu' sanācca hotā navya'śca satsi' |
svāṃcā'''gne tanuvaṃ' pipraya'svāsmabhyaṃ' ca saubha'gamāya'jasva ‖

gobhirjuṣṭa'mayujo niṣi'ktaṃ taveṃ''dra viṣṇoranusaṃca'rema |
nāka'sya pṛṣṭhamabhi saṃvasā'no vaiṣṇa'vīṃ loka iha mā'dayaṃtām ‖

oṃ kātyāyanāya' vidmahe' kanyakumāri' dhīmahi |
tanno' durgiḥ pracodayā''t ‖
oṃ śāṃtiḥ śāṃtiḥ śāṃtiḥ' ‖

ॐ ॥ जातवे'दसे सुनवाम सोम' मरातीयतो निद'हाति वेदः' |
स नः' पर्-षदति' दुर्गाणि विश्वा' नावेव सिंधुं' दुरिताऽत्यग्निः ॥

तामग्निव'र्णां तप'सा ज्वलंतीं वै'रोचनीं क'र्मफ़लेषु जुष्टा''म् |
दुर्गां देवीगं् शर'णमहं प्रप'द्ये सुतर'सि तरसे' नमः' ॥

अग्ने त्वं पा'रया नव्यो' अस्मांथ्-स्वस्तिभिरति' दुर्गाणि विश्वा'' |
पूश्च' पृथ्वी ब'हुला न' उर्वी भवा' तोकाय तन'याय शंयोः ॥

विश्वा'नि नो दुर्गहा' जातवेदः सिंधुन्न नावा दु'रिताऽति'पर्-षि |
अग्ने' अत्रिवन्मन'सा गृणानो''ऽस्माकं' बोध्यविता तनूना''म् ॥

पृतना जितगं सह'मानमुग्रमग्निगं् हु'वेम परमाथ्-सधस्था''त् |
स नः' पर्-षदति' दुर्गाणि विश्वा क्षाम'द्देवो अति' दुरिताऽत्यग्निः ॥

प्रत्नोषि' कमीड्यो' अध्वरेषु' सनाच्च होता नव्य'श्च सत्सि' |

स्वांचा''ऽग्ने तनुवं' पिप्रय'स्वास्मभ्यं' च सौभ'गमाय'जस्व ‖

गोभिर्जुष्ट'मयुजो निषि'क्तं तवें''द्र विष्णोरनुसंच'रेम ।
नाक'स्य पृष्ठमभि संवसा'नो वैष्ण'वीं लोक इह मा'दयंताम् ‖

ॐ कात्यायनाय' विद्महे' कन्यकुमारि' धीमहि ।
तन्नो' दुर्गिः प्रचोदया''त् ‖
ॐ शांतिः शांतिः शांतिः' ‖